# Goraksha StotrarajaH

# ગોરક્ષસ્તોત્રરાજઃ

## Document Information

Text title : Goraksha Stotrarajah

File name : gorakShastotrarAjaH.itx

Category : deities_misc, stavarAja

Location : doc_deities_misc

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Description/comments : Goraksha Nikilavani Year 11-10, page 31/32 . From kalpadrumatantra

Latest update : December 14, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 14, 2022

*sanskritdocuments.org*

Goraksha StotrarajaH

# ગોરક્ષસ્તોત્રરાજઃ

ૐ અસ્ય શ્રીગોરક્ષનાથસ્તોત્રમન્ત્રસ્ય વિષ્ણુ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીગોરક્ષ નિરઞ્જનો દેવતા ।
વિમલા શક્તિઃ । ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।
આકાશમન્દિરં ચૈવ તારારત્નૈશ્ચ મણ્ડિતમ્ ।
તસ્ય મધ્યે સ્થિતો નિત્યં વરાભયકરામ્બુજઃ ॥ ૧॥

નિરઞ્જનો નિરાકારો નિર્વિકલ્પો નિરામયઃ ।
અગમ્યોઽગોચરોઽલક્ષ્યો ગોરક્ષઃ સિદ્ધવન્દિતઃ ॥ ૨॥

કૌપીની ચ પરધ્યાની તપ્તકાઞ્ચનસન્નિભઃ ।
ધ્યેયઃ શિવઃ પરો દેવો જટામુકુટમણ્ડિતઃ ॥ ૩॥

ચિન્તામણિઃ પુમર્થાનાં ચન્દ્રાર્કાગ્નિત્રિલોચનઃ ।
સિદ્ધગન્ધર્વયક્ષેડ્યો દેવર્ષિગણસેવિતઃ ॥ ૪॥

વિમલા વામભાગે ચ નિજા શક્તિઃ પરાત્મિકા ।
એવં ધ્યાત્વા શિવં યોગી બદ્ધસિદ્ધાસનઃ સદા ॥ ૫॥

ઇદં સ્તોત્રં પઠેન્નિત્યં સર્વસિદ્ધિફલપ્રદમ્ ।
શ્રીગોરક્ષસ્તોત્રરાજં દુર્લભં ભુવનત્રયે ॥ ૬॥

દેવાસુરમનુષ્યાશ્ચ ન જાનન્તિ મહીતલે ।
સમ્યગ્જ્ઞાત્વા સ્તુતો દેવઃ સર્વકામપ્રદાયકઃ ॥ ૭॥

શ્રીગોરક્ષ ! નમસ્તુભ્યં નમસ્તુભ્યં સદાશિવ ! ।
સમ્પૂર્ણાય નમસ્તુભ્યં નમો લક્ષ્મીપ્રિયાય તે ॥ ૮॥

સર્વેષામેવ જન્તૂનાં પાપપુણ્યવિપાકદઃ ।
પરં બ્રહ્મ પરં ધામ ! શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૯॥

ગકારો ગુણસંયુક્તો રકારો રૂપલક્ષણઃ ।

ક્ષકારેણાક્ષયં બ્રહ્મ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૦॥

બ્રહ્મણાં ચ પરં બ્રહ્મ રુદ્રાદીનાં શિરોમણિઃ ।
ત્રૈલોક્યં નિર્મિતં યેન શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૧॥

ક્ષમાધારી જિતક્રોધઃ સન્તોષી વિજિતેન્દ્રિયઃ ।
ધર્માધર્મપરિત્યાગી શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૨॥

બ્રહ્મચારી સદાશુદ્ધઃ કાયકર્મી મહાતપાઃ ।
આશાપાશો હૃતો યેન શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૩॥

જ્ઞાની ધર્મેષુ યો લીનઃ સત્યવાદી દૃઢવ્રતઃ ।
આત્મધ્યાનરતો નિત્યં શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૪॥

શુભાશુભવિનિર્મુક્તો ભાવાભાવવિવર્જિતઃ ।
નિજભક્તે સ્વયં દાતા શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૫॥

નરલોકે નરાધીશો નાગલોકે ચ નાગરાટ્ ।
દેવલોકે ચ દેવેન્દ્રઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૬॥

રાજન્યાનાઞ્ચ યો રાજા મહારાજો મહેશ્વરઃ ।
મહીપતિર્મહીન્દ્રશ્ચ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૭॥

સમસ્તરસભોક્તા યો યઃ સદા ભોગવર્જિતઃ ।
સદા સમરસો યશ્ચ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૮॥

હઠયોગવિધાતા ચ મત્સ્યકીર્તિવિવર્ધનઃ ।
યોગિભિર્મનસા ગમ્યઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૧૯॥

રેચકઃ પૂરકશ્ચૈવ કુમ્ભક સ્ત્રોટક સ્તથા ।
પ્રાણાયામશ્ચતુર્ધા તે શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૦॥

બ્રહ્માદિશ્ચૈવ બિષ્ણવાદી રુદ્રાદિશ્ચ સદાશિવઃ ।
જ્યોતિર્મયોઽનવચ્છિન્નઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૧॥

સિદ્ધાનાઞ્ચ મહાસિદ્ધ ઋષીણાં ચ ઋષીશ્વરઃ ।
યોગિનાઞ્ચૈવ યોગીન્દ્રઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૨॥

પીઠાદીનાં મહાપીઠં શિવાદીનાં મહાશિવઃ ।
મન્ત્રાદીનાં મહામન્ત્રઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૩॥

વિશ્વતેજો વિશ્વરુપં વિશ્વવન્દ્યઃ સદાશિવઃ ।
વિશ્વનામા વિશ્વનાથ: શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૪॥

સર્વગુણો ગુણાભાવો નિર્ગુણશ્ચ ગુણસ્થિતઃ ।
સાકારો વા નિરાકારઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૫॥

અનન્તલોકનાથશ્ચ નાથનાથશિરોમણિઃ ।
સર્વનાથસમારાધ્યઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૬॥

વિશ્વોત્પત્તિકરશ્ચૈવ વિશ્વેષાં પ્રતિપાલકઃ ।
વિશ્વસંહારકર્તા ચ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૭॥

ઉત્પત્તિસ્થિતિસંહાર કારિણે ક્લેશહારિણે ।
સર્વાધારસ્વરુપાય શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૮॥

પિણ્ડબ્રહ્માણ્ડમધ્યે ચ ભુવનાનિ ચતુર્દશ ।
સર્વત્ર વ્યાપકો નાથઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૨૯॥

ન જાનામિ કુલં ગોત્રં વર્ણાવર્ણવિવર્જિત ! ।
લક્ષ્યાલક્ષ્યસ્વરુપોઽસિ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૦॥

નોત્પત્તિર્ન લયો નાસ્તે વિકારો ન ચ બન્ધનમ્ ।
સદા સમરસા બૃત્તિઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૧॥

ન માતા ન પિતા ચૈવ ન તે બન્ધુઃ સહોદરઃ ।
અજઃ સ્વયમ્ભૂઃ સર્વાત્મા શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૨॥

અદૃશ્યં દૃશ્યતે નાથ ! અશ્રાવ્યં શ્રૂયતે સદા ।
ત્વત્કૃપાલેશમાત્રેણ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૩॥

સર્વત્ર વ્યાપકઃ સૂક્ષ્મો જીવરુપી મહેશ્વરઃ ।
સર્વેન્દ્રિયમયો નાથ ! શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૪ ॥

ચન્દ્રાદીનાં તથા શૈત્યં સૂર્યાદીનાં ત્વમુષ્ણતા ।
સર્વસારસ્વરુપોઽસિ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૫॥

ઉત્તમં મધ્યમં નીચં ત્વયા સર્વ વિનિર્મિતમ્ ।
યર્થવાગ્નિઃ સર્વરુપઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૬॥

અણ્ડજસ્વેદજોદ્ભિજ્જ જેરજાનાં ત્વમુદ્ભવઃ ।
અનન્તકોટિજીવાનાં શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૭॥

વાયુસ્ત્વ પઞ્ચરુપેણ પ્રાણિનાં દેહધારકઃ ।
સ્વયં સર્વમયો નાથઃ શ્રીગોરક્ષ ! નમોસ્તુતે ॥ ૩૮॥

શૂન્યાનાં ચ પરં શૂન્યં પરેષાં પરમેશ્વરઃ ।
ધ્યાયતાઞ્ચ પરંધામ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૩૯॥

એકાકી વર્તતે નિત્યં ભવપાશવિવર્જિતઃ ।
પરં બ્રહ્માક્ષરં જ્યોતિઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૪૦॥

સ્વર્ગેષુ પૂજ્યતે દૈવૈર્મર્ત્યલોકેષુ માનવૈઃ ।
પાતાલે નાથલોકૈશ્ચ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૪૧॥

ત્રિનેત્ર સ્ત્રિપુરારાતિ સ્ત્રિવેદ સ્ત્રિજગત્પતિઃ ।
ત્રયીવેદ્ય સ્ત્રિદેવાત્મા શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૪૨॥

સિધ્દામ્નાયસમામ્નાતા સિધ્દામ્નાયૈકસિધ્દિદઃ ।
સિધ્દસઙ્ઘૈઃ સદા સેવ્યઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૪૩॥

તેજઃપુઞ્જઃ સ્વયં દેવો દીપો દીપ્તિમતામપિ ।
સર્વસ્વાન્તઃસ્થિતં જ્યોતિઃ શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૪૪॥

સર્વાસાં જીવજાતીનાં પાપપુણ્યૈકસાક્ષિણે ।
શુભાશુભફલાધ્યક્ષ ! શ્રીગોરક્ષ ! નમોઽસ્તુતે ॥ ૪૫॥

શ્રીગોરક્ષ સ્તોત્રરાજઃ સ્વયં કૃણેન નિર્મિતઃ ।
જપતાં ભક્તિભાવેન સર્વસિધ્દિવિધાયકઃ ॥ ૪૬॥

શિવસ્તોત્રં વિષ્ણુકૃતં બ્રહ્મણા પઠિતં પુનઃ ।
યે પઠન્તિ સદા ભક્ત્યા તે લભન્તે સમીહિતમ્ ॥ ૪૭॥

ઇદં સ્તોત્રં જપેન્નિત્યં સર્વપાપૈઃ પ્રમુચ્યતે ।
ધનં પુત્રાંસ્તથા દારાઁલ્લભતે નાત્ર સંશયઃ ॥ ૪૮॥

મનસા કર્મણા વાચા સ્તોત્રં યઃ પઠતે નરઃ ।
ઉધ્દરેત્સપ્તગોત્રાણિ કુલાન્યેકોત્તરં શતમ્ ॥ ૪૯॥

ધનવાઞ્જાયતે વંશે સ્તોત્રં યસ્ય હૃદિ સ્થિતમ્ ।
જન્મજન્મકૃતં પાપં નાશમાયાતિ સત્વરમ્ ॥ ૫૦॥

દર્શનં લભતે સાક્ષાચ્છ્રીનાથસ્ય જસ્પતવમ્ ।

ભૂર્જપત્રે લિખેત્સ્તોત્રમષ્ટગન્ધેન ભક્તિતઃ ॥ ૫૧॥

ધારયેતકણ્ઠમધ્યે ચ યમલોકે ન પીડ્યતે ।
સ્તોત્રરાજં જપેત્ પ્રાતઃ યત્સ્વયં હરિણોદિતમ્ ॥ ૫૨॥

ગોરક્ષમક્ષયં દેવં મનોવાચામગોચરમ્ ।
સિદ્ધનાથં સિદ્ધસેવ્યં લભતે નાત્ર સંશયઃ ॥ ૫૩॥

ઇતિ શ્રીકલ્પદ્રુમતન્ત્રે શ્રીકૃષ્ણવિરચિતઃ
શ્રીગોરક્ષનાથસ્તોત્રરાજઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Chandrasekhar Karumuri

*Goraksha StotrarajaH*
pdf was typeset on December 14, 2022

Please send corrections to *sanskrit@cheerful.com*